# shrIgokuleshotsavavarNanam

# શ્રીગોકુલેશોત્સવવર્ણનમ્

## Document Information

Text title : gokuleshotsavavarNanam

File name : gokuleshotsavavarNanam.itx

Category : vishhnu, krishna, puShTimArgIya, kRiShNarAya

Location : doc_vishhnu

Author : kRRiShNarAya

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીગોકુલેશોત્સવવર્ણનમ્

નન્દાલયાન્તે નિગમૈરગમ્યં
સનાતનં બ્રહ્મ યદસ્તિ ભૂમ્યા ।
ગોરૂપયા પ્રાર્થિત એવ કૃષ્ણો
વારત્રયં ચાવિરભૂત્ સ એવ ॥ ૧॥

તદા હિ ભૂમાવજનિષ્ટ પૂર્વં
શ્રીવલ્લભાચાર્ય ઇતિ પ્રસિદ્ધઃ ।
શ્રીવિઠ્ઠલેશોઽપિ તથોત્તરસ્માત્
શ્રીવલ્લભોઽભૂત્ કુલનામદીપઃ ॥ ૨॥

પુરાભિષિક્તઃ પયસા સુરભ્યા
કૃતઃ પતિત્વે નિજગોકુલસ્ય ।
સર્વેન્દ્રિયસ્વામિતયાપિ નામ્ના
ભક્તૈર્નિરુક્તોઽપિ સ ગોકુલેશઃ ॥ ૩॥

યસ્મિન્પ્રભુઃ પ્રાદુરભૂત્સ ભૂમૌ
કાલો મહાશોભન એવ જાતઃ ।
તદા હિ સર્વત્ર જગજ્જનાનાં
સુખાય તજ્જન્મદિનં બભૂવ ॥ ૪॥

યજ્જન્મનિ જગજ્જાતં મઙ્ગલૈકાતિમઙ્ગલમ્ ।
ગોકુલં સકલં ચાસીન્નવમઙ્ગલપૂરિતમ્ ॥ ૫॥

પ્રતિસંવત્સરં તસ્મિન્ ગોકુલેશજનુર્દિને ।
મહામહોત્સવા આસન્ સકલા ગોકુલૌકસઃ ॥ ૬॥

આબાલવૃદ્ધમખિલા ધન્યા ગોકુલવાસિનઃ ।
નિત્યોત્સવાસ્તદા હ્યાસન્નત્યુત્સવસમુત્સકાઃ ॥ ૭॥

વાદિત્રાણિ વિચિત્રાણિ વાદયન્તિ સ્મ વાદકાઃ ।

જગુર્મઙ્ગલગીતાનિ સુસ્વરાણ્યઙ્ગનાગણાઃ ॥ ૮॥

પ્રતિદ્વારમગારાણાં નવપલ્લવતોરણમ્ ।
બબન્ધુઃ સેવિનોઽન્યોન્યં ચક્રુઃ કુઙ્કુમમઞ્જનમ્ ॥ ૯॥

અભૂત્તસ્મિન્ મનોહારિશુભકારિજનુર્દિને ।
ગોકુલેશગૃહદ્વારિ ભૂરિવાદ્યાન્યવાદિષુઃ ॥ ૧૦॥

તત્ર દુન્દુભયો ધીરં મધુરધ્વનિ દધ્વનુઃ ।
ગોમુખાનિ સુખાન્યાસન્નખણ્ડં ડિણ્ડિમોનદદ્ ॥ ૧૧॥

ભેર્યશ્ચ ભૂરિશો નેદુર્ગમ્ભીરા ભૈરવારવાઃ ।
પણવાશ્ચ તથા વિપ્રા પ્રણવાદ્યાશિષોઽભવન્ ॥ ૧૨॥

વૈણવિકા અનણીયાંસો વીણાઃ કલભરીણાન્ ? ।
નવીના વેણવો રેણુઃ પ્રવીણા આપણાદિષુ ॥ ૧૩॥

અમન્દાનન્દસન્દોહદાયકા ગાયકા જગુઃ ।
મૃદઙ્ગા વૃન્દશો નેદુર્નૃત્યતાલક્રમાનુગાઃ ॥ ૧૪॥

તદા શૃઙ્ગારભોગાન્તે ગોકુલેશઃ સ્વયં પ્રભુઃ ।
મન્દિરાન્મઙ્ગલં સ્નાતુમાજગામ નિજં ગૃહમ્ ॥ ૧૫॥

તત્ર સ્થિત્વાઙ્ગણે ભદ્રં કર્તું સ્નાનં પ્રચક્રમે ।
સ્નાનીયસાધનં સર્વમાનિન્યુર્નિજસેવકાઃ ॥ ૧૬॥

કેચન મસ્તકે તૈલં સિષિચુઃ પુષ્પવાસિતમ્ ।
કેચિન્મૃગમદૈઃ કેચિદ્ઘુસૃણૈઃ કેઽપિ ચન્દનૈઃ ॥ ૧૭॥

સુગન્ધોદ્વર્તનૈસ્સર્વે જિજિષુસ્તસ્ય વિગ્રહમ્ ।
તત ઉષ્ણોદકૈઃ સસ્નૌ તદા તદ્દર્શનોત્સુકૈઃ ॥ ૧૮॥

તદાઙ્ગણગતૈર્ભક્તૈરનુરક્તૈસ્સસમ્ભ્રમૈઃ ।
પ્રાસાદશિખરારૂઢઃ સ ઘોષોઽતિમહાનભૂત્ ॥ ૧૯॥

સંવ્યાય વાસસી પીતે ગત્વા સ્વપ્રભુમન્દિરમ્ ।
તતોઽસૌ રાજભોગાન્તે પ્રભોર્નીરાજનં વ્યધાત્ ॥ ૨૦॥

અથ તત્રાઙ્ગણે સોઽયં ચતુષ્કોપરિ શોભને ।
પુત્રપૌત્રપ્રપૌત્રૈઃ સ્વૈર્નિષસાદ સહાસને ॥ ૨૧॥

પુરપીતસ્થિતાનષ્ટમુષ્ટિતણ્ડુલકલ્પિતાન્ ।
સખિબન્ધૂદિતૈર્મન્ત્રૈરુપચારૈરપૂપુજત્ ॥ ૨૨॥

તદન્તે ગોકુલેશસ્ય સ્વસૃપુત્ર્યાદયઃ સ્ત્રિયઃ ।
પતિમત્યઃ સતિલકં મૌક્તિકારાર્તિકં વ્યધુઃ ॥ ૨૩॥

નિજભક્તસ્ત્રિયોઽપ્યસ્ય કૃત્વા નીરાજનં તથા ।
તન્મૂર્ધ્નિ મૌક્તિકસ્વર્ણ-પુષ્પાઞ્જલિમવાકિરન્ ॥ ૨૪॥

તતોઽનુરક્તૈર્ભક્તૈઃ સ્વૈ રત્નાભરણભૂષિતઃ ।
બન્ધુભિઃ સહ વિપ્રૈશ્ચ ભોજનસ્થાનમાયયૌ ॥ ૨૫॥

બ્રાહ્મણાન્ભોજયિત્વા સ સબન્ધુર્બુભુજે સ્વયમ્ ।
ભોજિકાઃ સેવકાઃ સર્વે સ્વહસ્તપરિવેષણૈઃ ॥ ૨૬॥

ભોજનાન્તે સતામ્બૂલા બ્રાહ્મણા દદુરાશિષઃ ।
તતઃ સ્વમન્દિરાસ્તીર્ણનવાસનસુખસ્થિતઃ ॥ ૨૭॥

પુત્રપૌત્રપ્રપૌત્રૈશ્ચ વૃતોઽસૌ શુશુભેતરામ્ ।
નૃત્યવાદિત્રગીતાઢ્યં નાનોપાયનસમ્ભૃતમ્ ॥ ૨૮॥

મહામહોત્સવં ચક્રુસ્તદાઽઽસન્ધ્યં સ્વસેવકાઃ ।
દિવ્યાનિ પરિશ્રેયાનિ પટ્ટવસ્ત્રાણ્યનેકધા ॥ ૨૯॥

મૌક્તિકાનિ સરત્નાનિ સૌવર્ણાભરણાનિ ચ ।
સકુટુમ્બં ગોકુલેશં પ્રીતિતઃ પર્યધાપયન્ ॥ ૩૦॥

અનન્યાઃ સેવિનો ધન્યા દ્રવ્યાણ્યન્યાન્યનેકશઃ ।
ઉપાયનાન્યમી નિન્યુરન્યોન્યેભ્યોઽધિકાધિકમ્ ॥ ૩૧॥

રરાજ ગોકુલેશોઽસૌ સકુટુમ્બોઽતિભૂષિતઃ ।
પુષ્પિતઃ ફલિતો મૂર્તઃ શ્રઙ્ગારદ્રુરિવાદ્ભુતઃ ॥ ૩૨॥

ગોકુલે ગોકુલેશસ્ય સદા જન્મદિનોત્સવઃ ।
દૃષ્ટ આસન્ધ્યમાધિક્યં કૃષ્ણરાયેણ વર્ણિતઃ ॥ ૩૩॥

ઇતિ શ્રીકૃષ્ણરાયવિરચિતં શ્રીગોકુલેશોત્સવવર્ણનં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIgokuleshotsavavarNanam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*